# ॥ रामभुजङ्गप्रयातस्तोत्रम् ॥

विशुद्धं परं सच्चिदानन्द-रूपं
गुणाधारमाधार-हीनं वरेण्यम्।
महान्तं विभान्तं गुहान्तं गुणान्तं
सुखान्तं स्वयं धाम रामं प्रपद्ये॥ १ ॥

शिवं नित्यमेकं विभुं तारकाख्यं
सुखाकारमाकार-शून्यं सुमान्यम्।
महेशं कलेशं सुरेशं परेशं
नरेशं निरीशं महीशं प्रपद्ये॥ २॥

यदाऽवर्णयत् कर्ण-मूलेऽन्त-काले
शिवो राम रामेति रामेति काश्याम्।
तदेकं परं तारक-ब्रह्म-रूपं
भजेऽहं भजेऽहं भजेऽहं भजेऽहम्॥ ३॥

महारत्न-पीठे शुभे कल्प-मूले
सुखासीनमादित्य-कोटि-प्रकाशम्।
सदा जानकी-लक्ष्मणोपेतमेकं
सदा रामचन्द्रं भजेऽहं भजेऽहम्॥ ४॥

क्वणद्रत्न-मञ्जीर-पादारविन्दं
लसन्मेखला-चारु-पीताम्बराढ्यम्।
महारत्न-हारोल्लसत्-कौस्तुभाङ्गं
नदच्चञ्चरी-मञ्जरी-लोल-मालम् ॥५॥

लसच्चन्द्रिका-स्मेर-शोणाधराभं
समुद्यत्-पतङ्गेन्दु-कोटि-प्रकाशम् ।
नमद्-ब्रह्म-रुद्रादि-कोटीर-रत्न-
स्फुरत्-कान्ति-नीराजना-ऽऽराधिताङ्घ्रिम्॥ ६ ॥

पुरः प्राञ्जलीनाञ्जनेयादि-भक्तान्
स्व-चिन्मुद्रया भद्रया बोधयन्तम्।
भजेऽहं भजेऽहं सदा रामचन्द्रं
त्वदन्यं न मन्ये न मन्ये न मन्ये॥ ७॥

यदा मत्समीपं कृतान्तः समेत्य
प्रचण्ड-प्रतापैर्-भटैर्-भीषयेन्माम्।
तदाऽऽविष्करोषि त्वदीयं स्वरूपं
तदापत्-प्रणाशं स-कोदण्ड-बाणम्॥ ८॥

निजे मानसे मन्दिरे सन्निधेहि
प्रसीद प्रसीद प्रभो रामचन्द्र।
स-सौमित्रिणा कैकयी-नन्दनेन
स्व-शक्त्याऽनुभक्त्या च संसेव्यमान॥ ९॥

स्वभक्ताग्रगण्यैः कपीशैर्-महीशैर्-
अनीकैरनेकैश्च राम प्रसीद।
नमस्ते नमोऽस्त्वीश राम प्रसीद
प्रशाधि प्रशाधि प्रकाशं प्रभो माम्॥ १०॥

त्वमेवासि दैवं परं मे यदेकं
सुचैतन्यमेतत् त्वदन्यं न मन्ये।
यतोऽभूदमेयं वियद्-वायु-तेजो-
जलोर्व्यादि-कार्यं चरं चाचरं च॥ ११॥

नमः सच्चिदानन्द-रूपाय तस्मै
नमो देव-देवाय रामाय तुभ्यम्।
नमो जानकी-जीवितेशाय तुभ्यं
नमः पुण्डरीकायताक्षाय तुभ्यम्॥ १२॥

नमो भक्ति-युक्तानुरक्ताय तुभ्यं
नमः पुण्य-पुञ्जैक-लभ्याय तुभ्यम्।
नमो वेद-वेद्याय चाऽऽद्याय पुंसे
नमः सुन्दरायेन्दिरा-वल्लभाय॥ १३॥

नमो विश्व-कर्त्रे नमो विश्व-हर्त्रे
नमो विश्व-भोक्त्रे नमो विश्व-मात्रे।
नमो विश्व-नेत्रे नमो विश्व-जेत्रे
नमो विश्व-पित्रे नमो विश्व-मात्रे॥ १४॥

नमस्ते नमस्ते समस्त-प्रपञ्च-
प्रभाग-प्रवीण प्रमाण-प्रवीण।
मदीयं मनस्-त्वत्-पद-द्वन्द्व-सेवां
विधातुं प्रवृत्तं सुचैतन्य-सिद्ध्यै॥ १५॥

शिलाऽपि त्वदङ्घ्रि-क्षमा-सङ्गि-रेणु-
प्रसादाद्धि चैतन्यमाधत्त राम।
नरस्-त्वत्पद-द्वन्द्व-सेवा-विधानात्
सुचैतन्यमेतीति किं चित्रमद्य॥ १६॥

पवित्रं चरित्रं विचित्रं त्वदीयं
नरा ये स्मरन्त्यन्वहं रामचन्द्र।
भवन्तं भवान्तं भरन्तं भजन्तो
लभन्ते कृतान्तं न पश्यन्त्यतोऽन्ते॥ १७॥

स पुण्यः स गण्यः शरण्यो ममायं
नरो वेद यो देव-चूडामणिं त्वाम्।
सदाकारमेकं चिदानन्द-रूपं
मनो-वागगम्यं परं धाम राम॥ १८॥

प्रचण्ड-प्रताप-प्रभावाभिभूत-
प्रभूतारि-वीर प्रभो रामचन्द्र।
बलं ते कथं वर्ण्यतेऽतीव बाल्ये
यतोऽखण्डि चण्डीश-कोदण्ड-दण्डः॥ १९॥

दशग्रीवमुग्रं सपुत्रं समित्रं
सरिद्-दुर्ग-मध्यस्थ-रक्षो-गणेशम् ।
भवन्तं विना राम वीरो नरो वा-
ऽसुरो वाऽमरो वा जयेत् कस्-त्रिलोक्याम्॥ २०॥

सदा राम रामेति रामामृतं ते
सदाराममानन्द-निष्यन्द-कन्दम्।
पिबन्तं नमन्तं सुदन्तं हसन्तं
हनूमन्तमन्तर्भजे तं नितान्तम्॥ २१॥

सदा राम रामेति रामामृतं ते
सदाराममानन्द-निष्यन्द-कन्दम्।
पिबन्नन्वहं नन्वहं नैव मृत्योर्-
बिभेमि प्रसादादसादात् तवैव॥ २२॥

असीता-समेतैरकोदण्ड-भूषैर्-
असौमित्रि-वन्द्यैरचण्ड-प्रतापैः।
अलङ्केश-कालैरसुग्रीव-मित्रैर्-
अरामाभिधेयैरलं दैवतैर्नः॥ २३॥

अवीरासन-स्थैरचिन्मुद्रिकाढ्यैर्-
अभक्ताञ्जनेयादि-तत्त्व-प्रकाशैः।
अमन्दार-मूलैरमन्दार-मालैर्-
अरामाभिधेयैरलं देवतैर्नः॥२४॥

असिन्धु-प्रकोपैरवन्द्य-प्रतापैर्-
अबन्धु-प्रयाणैरमन्द-स्मिताढ्यैः।
अदण्ड-प्रवासैरखण्ड-प्रबोधैर्-
अरामाभिधेयैरलं देवतैर्नः॥२५॥

हरे राम सीतापते रावणारे
खरारे मुरारेऽसुरारे परेति।
लपन्तं नयन्तं सदा-कालमेवं
समालोकयाऽऽलोकयाऽशेष-बन्धो॥२६॥

नमस्ते सुमित्रा-सुपुत्राभिवन्द्य
नमस्ते सदा कैकयी-नन्दनेड्य।
नमस्ते सदा वानराधीश-वन्द्य
नमस्ते नमस्ते सदा रामचन्द्र॥२७॥

प्रसीद प्रसीद प्रचण्ड-प्रताप
प्रसीद प्रसीद प्रचण्डारि-काल।
प्रसीद प्रसीद प्रपन्नानुकम्पिन्
प्रसीद प्रसीद प्रभो रामचन्द्र॥२८॥

भुजङ्ग-प्रयातं परं वेद-सारं
मुदा रामचन्द्रस्य भक्त्या च नित्यम्।
पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे
स एव स्वयं रामचन्द्रः स धन्यः॥२९॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्री-गोविन्द-भगवत्पूज्य-पाद-शिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्री-रामभुजङ्गप्रयातस्तोत्रं सम्पूर्णम्॥

❀

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Rama_Bhujangaprayata_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits